# *॥ શ્રી ભાસ્કર સ્તોત્રં ॥*

અથ પૌરાણિકૈશ્લોકૈ રાષ્ટ્રૈ દ્વાદશાભિશુભૈ: ।
પ્રણ મેદ્દંડવદ્ભાનુમ સાષ્ટાંગમ ભક્તિસંયુત: ।

હંસાય ભુવનધ્વાંત ધ્વંસાયામિતતેજસે ।
હંસવાહનરૂપાય ભાસ્કરાય નમો નમ: ॥ 1॥

વેદાંગાય પતંગાય વિહંગારૂઢગામિને ।
હરિદ્વર્ણ તુરંગાય ભાસ્કરાય નમો નમ: ॥ 2 ॥

ભુવનત્રય દીપ્તાય ભુક્તિ મુક્તિ પ્રદાય ચ ।
ભક્તદારિદ્ર્યનાશાય ભાસ્કરાય નમો નમ: ॥ 3 ॥

લોકાલોક પ્રકાશાય સર્વલોકૈક ચક્ષુષે ।
લોકોત્તર ચરિત્રાય ભાસ્કરાય નમો નમ: ॥ 4 ॥

સપ્તલોકપ્રકાશાય સપ્તસપ્તિરથાય ચ ।
સપ્તદ્વીપ પ્રકાશાય ભાસ્કરાય નમો નમ: ॥ 5 ॥

માર્તાંડાય દ્યુમણયે ભાનવે ચિત્રભાનવે ।
પ્રભાકરાય મિત્રાય ભાસ્કરાય નમો નમ: ॥ 6 ॥

નમસ્તે કમલાનાથ નમસ્તે કમલપ્રિય ।
નમ: કમલહસ્તાય ભાસ્કરાય નમો નમ: ॥ 7 ॥

નમસ્તે બ્રહ્મરૂપાય નમસ્તે વિષ્ણુ રૂપિણે ।
નમસ્તે રુદ્ર રૂપાય ભાસ્કરાય નમો નમ: ॥ 8 ॥

સત્યજ્ઞાન સ્વરૂપાય સહસ્ત્ર કિરણાય ચ ।
ગીરવાણભેતિનાશાય ભાસ્કરાય નમો નમ: ॥ 9 ॥

સર્વ દુ:ખોપશાન્તાય સર્વ પાપ હરાય ચ ।
સર્વ વ્યાધિ વિનાશાય ભાસ્કરાય નમો નમ: ॥ 10 ॥

સહસ્ત્રપુત્રનેત્રાય સહસ્ત્રાક્ષસ્તુતાય ચ ।
સહસ્ત્ર નામધ્યેયાય ભાસ્કરાય નમો નમ: ॥ 11 ॥

નિત્યાય નિરવધાય નિર્મલ જ્ઞાનમૂર્તયે ।
નિગમાર્થ પ્રકાશાય ભાસ્કરાય નમો નમ: ॥ 12 ॥

આદિમધ્યાંત શૂન્યાય વેદવેદાંતવેદિને ।
નાદબિંદુ સ્વરૂપાય ભાસ્કરાય નમો નમ: ॥ 13 ॥

નિર્મલ જ્ઞાનસ્વરૂપાય રમ્યતેજસ્વરૂપિણે ।
બ્રહ્મતેજસ્સ્વરૂપાય ભાસ્કરાય નમો નમ: ॥ 14 ॥

નિત્યજ્ઞાનાય સત્યાય નિર્મલ જ્ઞાનમૂર્તયે ।
નિગમાર્થસ્વરૂપાય ભાસ્કરાય નમો નમ: ॥ 15 ॥

કુષ્ટવ્યાધિ  વિનાશાય દુષ્ટવ્યાધિ હરાય ચ ।
ઈષ્ટાર્થ દાયિને તસ્મૈ ભાસ્કરાય નમો નમ: ॥ 16 ॥

ભવરોગૈકવૈદ્યાય સર્વરોગાપ હારિણે
એકનેત્ર સ્વરૂપાય ભાસ્કરાય નમો નમ: ॥ 17 ॥

દારિદ્ર્યદોષનાશાય ઘોર પાપ હરાય ચ ।
દુષ્ટશિક્ષણધુર્યાય ભાસ્કરાય નમો નમ: ॥ 18 ॥

હોમાનુષ્ઠાનરૂપેણ કાલમૃત્યુહરાય ચ ।
હિરણ્યવર્ણ દેહાય ભાસ્કરાય નમો નમઃ ॥ 19 ॥

સર્વસંપત પ્રદાત્રે ચ સર્વદુ:ખ વિનાશને ।
સર્વોપદ્રવનાશાય ભાસ્કરાય નમો નમઃ ॥ 20 ॥

નમો ધર્મનિદાનાય નમત્સુકૃત સાક્ષિણે।
નમઃ પ્રત્યક્ષરૂપાય ભાસ્કરાય નમો નમઃ ॥ 21 ॥

સર્વ લોકૈક પૂર્ણાય કાલકર્માઘ  હારિણે ।
નમઃ પુણ્ય સ્વરૂપાય ભાસ્કરાય નમો નમઃ ॥ 22 ॥

દ્વંદ્વવ્યાધિ વિનાશાય સર્વદુ:ખ વિનાશિને ।
નમસ્તાપત્રયઘ્નાય ભાસ્કરાય નમો નમઃ ॥ 23 ॥

કાલરૂપાય કલ્યાણમૂર્તયે કારણાય ચ ।
અવિદ્યાભવસંહર્ત્રે ભાસ્કરાય નમો નમઃ ॥ 24 ॥

॥ ભાસ્કર સ્તોત્રમ સંપૂર્ણમ ॥